# Shri Mathurastavah

# શ્રીમથુરાસ્તવઃ

## Document Information

Text title : mathurAstavaH

File name : mathurAstavaH.itx

Category : vishhnu, krishna, rUpagosvAmin, stavamAlA

Location : doc_vishhnu

Author : Rupagoswami

Transliterated by : Jan Brzezinski (Jagadananda Das) jankbrz at yahoo.com and Neal Delmonico (Nitai Das) ndelmonico at sbcglobal.net

Description/comments : From stavamAlA (rUpagosvAmivirachitA) Garland of Devotional Prayers stavamAlA

Acknowledge-Permission: http://granthamandira.net Gaudiya Grantha Mandira

Latest update : February 22, 2019

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 25, 2021

*sanskritdocuments.org*

# શ્રીમથુરાસ્તવઃ

મુક્તેર્ગોવિન્દભક્તેર્વિતરણચતુરં સચ્ચિદાનન્દરૂપં
    યસ્યાં વિદ્યોતિ વિદ્યાયુગલમુદયતે તારકં પારકં ચ ।
કૃષ્ણસ્યોત્પત્તિલીલાખનિરખિલજગન્મૌલિરત્નસ્ય સા તે
    વૈકુણ્ઠાદ્ યા પ્રતિષ્ઠા પ્રથયતુ મથુરા મઙ્ગલાનાં કલાપમ્ ॥ ૧॥

કોટીન્દુસ્પષ્ટકાન્તી રભસયુતભવક્લેશયૌધેરયોધ્યા
    માયાવિત્રાસિવાસા મુનિહૃદયમુષો દિવ્યલીલા સ્રવન્તી ।
સાશીઃ કાશીશમુખ્યામરપતિભિરલં પ્રાર્થિતદ્વારકાર્યા
    વૈકુણ્ઠોદ્ગીતકીર્તિર્દિશતુ મધુપુરી પ્રેમભક્તિશ્રિયં વઃ ॥ ૨॥

બીજં મુક્તિતરોરનર્થપટલીનિસ્તારકં તારકં
    ધામ પ્રેમરસસ્ય વાઞ્છિતધુરાસમ્પારકં પારકમ્ ।
એતદ્ યત્ર નિવાસિનામુદયતે ચિચ્છક્તિવૃત્તિદ્વયં
    મથ્નાતુ વ્યસનાનિ માથુરપુરી સા વઃ શ્રિયં ચ ક્રિયાત્ ॥ ૩॥

અધાવન્તિ પતદ્ગ્રહં કુરુ માયે શનૈર્વીજય
    ચ્છત્રં કાઞ્ચિ ગૃહાણ કાશિ પુરતઃ પાદૂયુગં ધારય ।
નાયોધ્યે ભજ સમ્ભ્રમં સ્તુતિકથાં નોદ્ગારય દ્વારકે
    દેવીયં ભવતીષુ હન્ત મથુરા દૃષ્ટિપ્રસાદં દધે ॥ ૪॥

ઇતિ શ્રીરૂપગોસ્વામિવિરચિતસ્તવમાલાયાં મથુરાસ્તવઃ સમાપ્તઃ ।

*Shri Mathurastavah*

pdf was typeset on November 25, 2021

Please send corrections to *sanskrit@cheerful.com*